# Gayatri-Gitika (Song for Gāyatrī)

# गायत्री-गीतिका

## Document Information

Text title : Gayatri Gitika

File name : gAyatrIgItikA.itx

Category : devii, gAyatrI, panchaka, hkmeher

Location : doc_devii

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Sanskrit K□vya M□trig□tik□□jalih

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Gayatri-Gitika (Song for Gāyatrī)

# गायत्री-गीतिका

The famous Mantra of Savitṛ appears in the Ṛg-Veda.
"Tat Savitur vareṇyam bhargo devasya dhīmahi, Dhiyo yo nah prachodayāt."
Prefixed with Mahā Vyāhṛtis Bhuh, Bhuvah, Svah and Praṇava Om, this forms Gāyatrī Mantra.

**ॐ भूर्भुवः स्वः**
**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि,**
**धियो यो नः प्रचोदयात् ।**

It means :
"We meditate on the adorable excellence of God Savitr who would stimulate our intellect."

Gāyatrī is the power of God Savitṛ (Sun). She is worshipped in three forms in spiritual perspective. Rays of Sun are the givers of life and well-being to the worldly creatures, also are described as the panacea for all diseases from scientific point-of-view. A synthesis of spiritual and scientific conceptions is presented in this song.

## गायत्री-गीतिका

**ॐ भूर्भुवः स्वः ।**
**ध्येया धियो नः प्रचोदयित्री,**
**सुनुता धरण्या**
**शक्तिः सुपुण्या**
**सवितु-र्वरेण्या,**
**गायत्री सरस्वती सावित्री ।**
**गायत्री सरस्वती सावित्री ॥ (ध्रुवम्)॥**

तामिस्रहा दीप्त-सहस्र-हस्ता, प्रज्ञावती ;
यस्यां समस्ता जडता निरस्ता, सा भारती ।
ज्योतिः-स्वरूपा प्रकाशयित्री,
निगमाग्रगण्या
शक्तिः सुपुण्या
सवितु-र्वरेण्या,
गायत्री सरस्वती सावित्री ।
गायत्री सरस्वती सावित्री ॥ १॥

शोभामयी शुभ्र-विशुद्ध-सत्त्वा, हंसासना ;
संसार-शमनी शिव-शर्म-तत्त्वा, सोपासना ।
सा वेद-माता प्रमोदयित्री,
श्रुति-नाद-गुण्या
शक्तिः सुपुण्या
सवितु-र्वरेण्या,
गायत्री सरस्वती सावित्री ।
गायत्री सरस्वती सावित्री ॥ २॥

नित्य-स्तुता सत्य-पथानुकूला, सा मङ्गला ;
विश्व-प्रसूति-स्थिति-नाश-मूला, साऽनर्गला ।
त्रैश्वर्य-मूर्त्तेः प्रवर्त्तयित्री,
महतां शरण्या
शक्तिः सुपुण्या
सवितु-र्वरेण्या,
गायत्री सरस्वती सावित्री ।
गायत्री सरस्वती सावित्री ॥ ३॥

भर्गात्मिका सा सुभगा नमस्या, पद्मानना ;
शुभदावकाशा भक्त्या हि यस्या, नीराजना ।
धर्मस्य धात्री विकासयित्री,
प्रणवैक-वर्ण्या
शक्तिः सुपुण्या
सवितु-र्वरेण्या,
गायत्री सरस्वती सावित्री ।

गायत्री सरस्वती सावित्री ॥ ४॥

आरोग्यदा लोक-रुजापहन्त्री, सञ्जीवनी ;
ध्वस्ताशिवा स्वस्तिमती नियन्त्री, सन्दीपनी ।
सर्वत्र दिव्या पवित्रयित्री,
वरदा हिरण्या
शक्तिः सुपुण्या
सवितु-र्वरेण्या
गायत्री सरस्वती सावित्री ।
गायत्री सरस्वती सावित्री ॥ ५॥

– गीत-रचना : डॉ हरेकृष्ण-मेहेरः
("मातृगीतिकाञ्जलिः" - काव्यतः)

(Composed in self-innovated original new lyrical maatraa-metre, which has been named 'vareNyA'.)
(From Sanskrit Kāvya Mātrigītikāñjalih)

Copyright Dr.Harekrishna Meher

*Gayatri-Gitika (Song for Gāyatrī)*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*